# Shri Hayagriva Panjaram 1

# શ્રીહયગ્રીવપઞ્જરમ્ ૧

## Document Information

Text title : hayagrIvapanjaram 1

File name : hayagrIvapanjaram1.itx

Category : vishhnu, panjara, vishnu

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : April 12, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીહયગ્રીવપઞ્જરમ્ ૧

(શ્રીહયગ્રીવ મૂલમંત્રસ્તુતિઃ)
અસ્ય કલ્પં પ્રવક્ષ્યામિ હયગ્રીવસ્ય પઞ્જરમ્ ।
યસ્ય વિજ્ઞાનમાત્રેણ વાણી ગઙ્ગેવ નિઃસરેત્ ॥ ૧॥

શુદ્ધસ્ફટિકસઙ્કાશં તુષારાચલસન્નિભમ્ ।
શ્વેતપર્વતસઙ્કાશચન્દ્રમણ્ડલમધ્યગમ્ ॥ ૨॥

ચતુર્ભુજમુદારાઙ્ગં પુણ્ડરીકાયતેક્ષણમ્ ।
શઙ્ખચક્રધરં દેવં કિરીટમકુટોજ્જ્વલમ્ ॥ ૩॥

કૌસ્તુભોદ્ભાસિતોરસ્કં વનમાલાવિરાજિતમ્ ।
પીતામ્બરધરં દેવં શ્રીવત્સાઙ્કિતવક્ષસમ્ ॥ ૪॥

મુખ્યહસ્તદ્વયેનૈવ જ્ઞાનમુદ્રાક્ષપુસ્તકમ્ ।
ધારયન્તં હયગ્રીવં ધ્યાયેદિષ્ટાર્થસિદ્ધયે ॥ ૫॥

(નમસ્તુભ્યં જગન્નાથ! લક્ષ્મીકાન્ત! પરાત્પર!।
નમોવાચં પુરશ્ચક્રે વિદ્યારાજાય વિષ્ણવે॥)
ઓઙ્કારાદ્ગીથરૂપાય ઋગ્યજુસ્સામમૂર્તયે ।
નમોઽસ્તુ દેવદેવાય વાઞ્છિતાર્થપ્રદાયિને ॥ ૬॥

અજ્ઞાનતિમિરં છિન્ધિ જ્ઞાનં ચાશુ પ્રયચ્છ મે ।
દેહિ મે દેવદેવેશ હયશીર્ષ નમોઽસ્તુ તે ॥ ૭॥

ભૂતપ્રેતપિશાચાદીન્ છિન્ધિ દેવ જનાર્દન ।
જ્વરાદીન્નિખિલાન્ રોગાન્ નાશયાઽઽશુ રમાપતે ॥ ૮॥

દારિદ્ર્યં સકલં છિન્ધિ કુરુ સૌભાગ્યભાજનમ્ ।
શત્રૂન્નાશય મે દેવ હયશીર્ષ નમોઽસ્તુ તે ॥ ૯॥

મેધાં પ્રજ્ઞાં બલં વિદ્યાં સમ્પદં પુત્રપૌત્રકમ્ ।

દેહિ મે દેવદેવેશ હયશીર્ષ નમોઽસ્તુ તે ॥ ૧૦॥

કાર્કોટકમુખાન્સર્પાન્ વિષાદીન્વિલયં નય ।
અમૃતં કુરુ મે દેવ હયશીર્ષ નમોઽસ્તુતે ॥ ૧૧॥

સ્ત્રીવશ્યં જનવશ્યં ચ રાજવશ્યં પરાત્પરમ્ ।
કુરુ દેવાઙ્ગનાવૃન્દસેવ્યમાનપદામ્બુજ ॥ ૧૨
હંસાયપરમેશાયચન્દ્રમણ્ડલવાસિને ।
નમો હયોત્તમાઙ્ગાય વાઞ્છિતાર્થપ્રદાયિને ॥ ૧૩॥

ઋગ્યજુસ્સામરૂપાય ઋતાય મહતે નમઃ ।
ઋક્ષેશબિન્દુમધ્યસ્થરાજીવાસનભાજિને ॥ ૧૪॥

વેદવેદાન્તવેદ્યાય વેદાહરણકર્મણે ।
સત્ત્વાસત્ત્વમહામોહભેદિને બ્રહ્મણે નમઃ ॥ ૧૫॥

પ્રજ્ઞાનદાયિને નિત્યં ભજતાં ભાવિતાત્મનામ્ ।
પ્રણવોદ્ગીથવપુષે પ્રણતિં પ્રતિપાદયે ॥ ૧૬॥

મન્દારકુન્દસ્ફટિકમહનીયોરુવર્ચસે ।
મનીષાપ્રદદેવાય મહાશ્વશિરસે નમઃ ॥ ૧૭॥

ઇતિદ્વાદશમન્ત્રેણ નમસ્કુર્યાજ્જનાર્દનમ્ ।
પ્રાતઃપ્રસન્નવદનં પૂર્વાચાર્યાભિવન્દિતમ્ ॥ ૧૮॥

(પ્રાચી સન્ધ્યા કાચિદન્તર્નિશાયાઃ
પ્રજ્ઞાદૃષ્ટે રઞ્જનશ્રીરપૂર્વા ।
વક્ત્રી વેદાન્ભાતુ મે વાજિવક્ત્રા
વાગીશાખ્યા વાસુદેવસ્ય મૂર્તિઃ ॥

નિર્મલજ્ઞાનસન્દોહં ધ્વાન્તધ્વંસનકર્મઠમ્ ।
નમામિ તુરગગ્રીવં હરિં સારસ્વતપ્રદમ્ ॥)

ઇતિ હય્ગ્રીવપઞ્જરમ્ ૧ સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Shri Hayagriva Panjaram 1*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*